# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा-अक्टूबर-२०१९

| | | |
|---|---|---|
| कक्षा -शास्त्रितृतीयवर्षम् (SEM-5) | प्रश्नपत्रम्-६ | गुणाः - ७० |
| विषयः - फलितज्योतिषम्। | (C.C.- 3.5.10. NEW ) | समयः ३:०० तः ६:०० |
| दिनाङ्कः - १५/१०/२०१९ | सन्दर्भग्रन्थः-सचित्रसामुद्रिकरहस्यम् , केरलप्रश्नसंग्रहम्। | |

**प्रथमान्वितिः**

**प्रश्नः १ अधोलिखितेभ्यः कयोश्चित् द्वयोः सान्वयं व्याख्यां करोतु। १०**

(१) ललाटे लिखितं धात्रा रेखा चिह्नं शुभाऽशुभम्।
यद् ज्ञात्वा पुरुषो लोके त्रिकालज्ञौ भवेद् ध्रुवम्॥

(२) पितृवित्तेन विहीना भवन्ति निम्नेन करतलेन नराः।
संवृत्तनिम्नैर्धनिनः प्रोक्तानकराश्च दातारः॥

(३) विधवा बहुरेखेण विरेखेण दरिद्रिकी।
भिक्षुकी सुशिराढ्येन नारी करतलेन वै॥

**प्रश्नः २ अधोलिखितयोः कस्यचित् एकस्य उपरि निबन्धं लिखतु। १०**

(१) साधारणमृगलक्षणम्।

(२) तुरगसामान्यभेदः।

**द्वितीयान्वितिः**

**प्रश्नः ३ अधोलिखितेभ्यः कयोश्चित् द्वयोः सान्वयं व्याख्यां करोतु। १०**

(१) यदा स्वान्तरेखा शनिस्थानभेत्थ
शिरो रेखया संयुतः पाणियुग्मे।
तदा लक्षणज्ञाः विचार्योदमाहुः
बलात्तस्य पुंसश्च भादिप्रणाशः॥

(२) तर्जनीमूलगामिन्यां रेखायां छिद्रता यदि।
श्वाविन-मूषिक-मार्जार-सर्पदंशो भविष्यति॥

(३) तृतीयेषु सर्वाङ्गुली-पर्वसु स्यात्
पवाङ्को नरो दुर्गतायार युक्तः।
निमज्याऽप्सु पन्चत्वमेतीहु लोके
विचार्येदमाहुर्बधाः लक्षणज्ञाः॥

**प्रश्नः ४ अधोलिखितयोः कस्यचित् एकस्य उपरि निबन्धं लिखतु।** **१०**

(१) दिग्ज्ञानम्।

(२) पुण्यरेखाविचारः।

**तृतीयान्वितिः**

**प्रश्नः ५ अधोलिखितेभ्यः कयोश्चित् द्वयोः सान्वयं व्याख्यां करोतु।** **१०**

(१) यदि प्रष्टा प्रश्नसमये स्वकायं स्पृष्टे पृच्छति।
तदा संयुक्तप्रश्नः स च लाभकरो भवति॥

(२) आलिङ्गिते दिनं प्रोक्तं मासः स्यादभिधूमिते।
दग्धे च वत्सरं प्रोक्तं मूलदेवेन भाषितम्॥

(३) उच्चारितफलादीनामाद्याक्षरवशात् फलम्।
ज्ञात्वाऽकारादिवर्गाश्च ध्वजादय इति क्रमात्॥

**प्रश्नः ६ अधोलिखितयोः कस्यचित् एकस्य उपरि निबन्धं लिखत।** **१०**

(१) लाभालाभप्रश्नाः। (२) पराजयप्रश्नाः।

**संयुक्तान्वितिः**

**प्रश्नः ७ अधोलिखितेषु केषाञ्चित् दशप्रश्नानामतिलघूत्तराणि लिखन्तु।** **१०**

(१) पन्चाङ्गे कानि अङ्गानि सन्ति ?

(२) मातृरेखा यदि उत्तमा स तदा किं फलं भवति ?

(३) आयुः कर्म च वित्तं च विद्या निधनमेव च पञ्चैतान् कुत्र सृज्यन्ते ?

(४) यदि नेत्रं पीतं तदा किं भवति ?

(५) यदि अधरं स्थूलं तदा किं फलं भवति ?

(६) जातकस्य करतले यदि तिलं भवति तदा किं फलं भवति ?

(७) मणिबन्धे प्रायः कति रेखाः भवन्ति ?

(८) योगरेखायुक्तनरः किं भवति ?

(९) भूमिपुत्रः कः ?

(१०) कति पुरुषार्थाः भवन्ति ?

(११) हस्ते आयुरेखा सूक्ष्मं तस्य किं फलं भवति ?

(१२) केरलशास्त्रे कति प्रकारकाः प्रश्नाः भवन्ति ?

(१३) धातवो कतिधा ?

(१४) केरलप्रश्नशास्त्रसंग्रहस्य पूर्वार्धे कति श्लोकाः सन्ति ?

(१५) शिरस्पर्शपूर्वकंप्रश्नंपृच्छेत् तदा फलं किम् ?

----oooo----